# Rishibhih Kritam 2 Vishnu Stotram

# ऋषिभिः कृतं २ विष्णुस्तोत्रम्

## Document Information

Text title : Rishibhih Kritam 2 Vishnu Stotram

File name : RRiShibhiHkRRitaM2viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | adhyAya 84/8-18||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# ऋषिभिः कृतं २ विष्णुस्तोत्रम्

ऋषय ऊचुः ।
नमः परमकल्याण कल्याणायात्मयोगिने ।
जनार्द्दनाय देवाय श्रीधराय च वेधसे ॥ ८॥

नमः कमलकिञ्जल्कसुवर्णमुकुटाय च ।
केशवायातिसूक्ष्माय बृहन्मूर्तें नमो नमः ॥ ९॥

महात्मने वरेण्याय नमः पङ्कजनाभये ।
नमोऽस्तु मायाहरये हरये हरिवेधसे ॥ १.८४.१०॥

हिरण्यगर्भगर्भाय जगतः कारणात्मने ।
अच्युताय नमो नित्यमनन्ताय नमो नमः ॥ ११॥

नमो मायापटच्छन्न जगद्धात्रे महात्मने ।
संसारसागरोत्तार ज्ञानपोतप्रदायिने ।
अकुण्ठमतये धात्रे सर्गस्थित्यन्त कर्मणे ॥ १२॥

यथा हि वासुदेवेति प्रोक्ते नश्यति पातकम् ।
तथा विलयमभ्येतु दैत्योऽयं मेघवाहनः ॥ १३॥

यथा विष्णुः स्वभक्तेषु पापमाप्नोति संस्थितम् ।
तथा विनाशमायातु दैत्योऽयं पापकर्मकृत् ॥ १४॥

स्मृतमात्रो यथा विष्णुः सर्वं पापं व्यपोहति ।
तथा प्रणाशमभ्येतु दैत्योऽयं मेघवाहनः ॥ १५॥

भवन्तु भद्राणि समस्तदोषाः प्रयान्तु नाशं जगतोऽखिलस्य ।
अभेद्यभक्त्या परमेश्वरेशे स्मृते जगद्धातरि वासुदेवे ॥ १६॥

ये भूतले ये दिवि येऽन्तरिक्षे रसातले प्राणिगणाश्च केचित् ।
भवन्तु ते सिद्धियुता नरोत्तमाः स्मृते जगद्धातरि वासुदेवे ॥ १७॥

ये प्राणिनः कुत्रचिदत्र सन्ति ब्रह्माण्डमध्ये परतश्च केचित् ।
तेषां तु सिद्धिः परमास्त्वनिन्द्या स्तुते जगद्धातरि वासुदेवे ॥ १८॥

इति श्रीस्कन्दपुराणे प्रभासखण्डे प्रभासक्षेत्रमाहात्म्ये चतुरशीतितमाध्यायान्तर्गतं ऋषिभिः कृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । प्रभासखण्ड । अध्याय ८४/८-१८॥

skandapurANa . prabhAsakhaNDa . adhyAya 84/8-18..

Proofread by PSA Easwaran

*Rishibhih Kritam 2 Vishnu Stotram*
pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*